## पापं च शिल्पिनि। (६८/३८०२)

पापशब्दः[1] शिल्पिवाचिनि उत्तरपदे [2]विभाषा आद्युदात्तो भवति[3]। पापनापितः, पापनापितः। पापकुलालः, पापकुलालः। 'पापाणके कुत्सितैः' (२.१.५४/७३३) इति पापशब्दस्य प्रतिपदोक्तः[4] समानाधिकरण[5]समासः इति [6]षष्ठीसमासे न भवति, पापस्य नापितः पापनापितः इति॥

## गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे। (६९/३८०३)

गोत्रवाचिनि अन्तेवासिवाचिनि चोत्तरपदे [7]माणवब्राह्मणयोश्च क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तं भवति। जङ्घावात्स्यः। यो जङ्घादानं ददान्यहम् इति वात्स्यः सम्पद्यते स जङ्घावात्स्यः इति क्षिप्यते। भार्यासौश्रुतः। सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः। वशाब्राह्मकृतेयः। ब्रह्मकृतशब्दः शुभ्रादिषु पठ्यते। गोत्र।

अन्तेवासि – कुमारीदाक्षाः। कम्बलचारायणीयाः। घृतरौढीयाः। ओदनपाणिनीयाः। कुमार्यादिलाभकामा ये दाक्षादिभिः प्रोक्तानि शास्त्राण्यधीयते तच्छिष्यतां वा प्रतिपद्यन्ते त एवं क्षिप्यन्ते। अन्तेवासि।

माणव – भिक्षामाणवः। भिक्षां लप्स्ये[8]ऽहमिति माणवो भवति[9]। माणव। ब्राह्मण – दासीब्राह्मणः। वृषलीब्राह्मणः। भयब्राह्मणः। यो भयेन ब्राह्मणः सम्पद्यते। अत्र यस्यान्यत् समासलक्षणं नास्ति,[10] सुप्सुपा इत्येव तत्र समासः कर्तव्यः। गोत्रादिषु इति किम्? दासीश्रोत्रियः। क्षेपे इति किम्? महाब्राह्मणः॥

## अङ्गानि मैरेये। (७०/३८०४)

मैरेयशब्दे उत्तरपदे तदङ्गवाचीनि पूर्वपदान्याद्युदात्तानि भवन्ति। गुडमैरेयः। मधुमैरेयः। मद्यविशेषो मैरेयस्तस्य गुडविकारस्य गुडोऽङ्गं भवति, मधुविकारस्य तस्य मधु अङ्गम्। अङ्गानि इति किम्? परममैरेयः। मैरेये इति किम्? [11]पुष्पासवः। फलासवः॥

## भक्ताख्यास्तदर्थेषु। (७१/३८०५)

भक्तमन्नम्, तदाख्यास्तद्वाचिनः शब्दाः, तदर्थेषूत्तरपदेषु आद्युदात्ता भवन्ति। [12]भिक्षाकंसः। श्राणाकंसः। भाजीकंसः। भिक्षादयो[13]ऽन्नवचनाः। भक्ताख्याः इति किम्? समाशशालयः। समशनं समाशः इति क्रियामात्रमुच्यते, न द्रव्यम्। तदर्थेषु इति किम्? [14]भिक्षाप्रियः। बहुव्रीहिरयम्, अत्र पूर्वपदमन्तोदात्तम्॥

## गोबिडालसिंहसैन्धवेषूपमाने। (७२/३८०६)

गवादिषु उपमानवाचिषु उत्तरपदेषु पूर्वपदमाद्युदात्तं भवति। धान्यगवः। [15]भिक्षाबिडालः। तृणसिंहः।

---

1. पूर्वपदम् इत्यधिकम् फ. 2. परतः इत्यधिकम् ह. 3. चकारो विभाषानुकर्षणार्थः इत्यधिकम् ह. 4. समासः इत्यधिकम् ह. 5. समासः नास्ति ह. 6. षष्ठीसमासो फ. 7. माणव ब्राह्मण इत्यनयोः फ. 8. अहं नास्ति फ. 9. श्राद्धमाणवः ब्राह्मणः इत्यधिकम् ह. 10. तस्य इत्यधिकम् फ. 11. पुष्पासवः नास्ति फ. 12. उदाहरणमिदं नास्ति फ. 13. अन्नविशेषाः फ. 14. श्राणाप्रियः फ. 15. श्राणाबिडालः ग.